योगवासिष्ठः/प्रकरणम् १ (वैराग्यप्रकरणम्)/सर्गः १४

चतुर्दशः सर्गः १४

श्रीराम उवाच ।

आयुः पल्लवकोणाग्रलम्बाम्बुकणभङ्गुरम् ।

उन्मत्तमिव संत्यज्य यात्यकाण्डे शरीरकम् ।। १

विषयाशीविषासङ्गपरिजर्जरचेतसाम् ।

अप्रौढात्मविवेकानामायुरायासकारणम् ।। २

ये तु विज्ञातविज्ञेया विश्रान्ता वितते पदे ।

भावाभावसमाश्वासमायुस्तेषां सुखायते ।। ३

वयं परिमिताकारपरिनिष्ठितनिश्चयाः ।

संसाराभ्रतडित्पुञ्जे मुने नायुषि निर्वृताः ।। ४

युज्यते वेष्टनं वायोराकाशस्य च खण्डनम् ।

ग्रथनं च तरङ्गाणामास्था नायुषि युज्यते ।। ५

पेलवं शरदीवाभ्रमस्नेह इव दीपकः ।

तरङ्गक इवालोलं गतमेवोपलक्ष्यते ।। ६

तरङ्गं प्रतिबिम्बेन्दुं तडित्पुञ्जं नभोम्बुजम् ।

ग्रहीतुमास्थां बध्नामि न त्वायुषि हतस्थितौ ।। ७

अविश्रान्तमनाः शून्यमायुराततमीहते ।

दुःखायैव विमूढोऽन्तर्गर्भमश्वतरी यथा ।। ८

संसारसंसृतावस्यां फेनोऽस्मिन्सर्गसागरे ।

कायवल्लयाम्भसो ब्रह्मञ्जीवितं मे न रोचते ।। ९

प्राप्यं संप्राप्यते येन भूयो येन न शोच्यते ।

पराया निर्वृतेः स्थानं यत्तज्जीवितमुच्यते ।। १०

तरवोऽपि हि जीवन्ति जीवन्ति मृगपक्षिणः ।
स जीवति मनो यस्य मननेन न जीवति ।। ११

जातास्त एव जगति जन्तवः साधुजीविताः ।
ये पुनर्नेह जायन्ते शेषा जरठगर्दभाः ।। १२

भारोऽविवेकिनः शास्त्रं भारो ज्ञानं च रागिणः ।
अशान्तस्य मनो भारो भारोऽनात्मविदो वपुः ।। १३

रूपमायुर्मनो बुद्धिरहंकारस्तथेहितम् ।
भारो भारधरस्येव सर्वं दुःखाय दुर्धियः ।। १४

अविश्रान्तमनापूर्णमापदां परमास्पदम् ।
नीडं रोगविहङ्गानामायुरायासनं दृढम् ।। १५

प्रत्यहं खेदमुत्सृज्य शनैरलमनारतम् ।
आखुनेव जरच्छुभ्रं कालेन विनिहन्यते ।। १६

शरीरबिलविश्रान्तैर्विषदाहप्रदायिभिः ।
रोगैरापीयते रौद्रैर्व्यालैरिव वनानिलः ।। १७

प्रस्नुवानैरविच्छेदं तुच्छैरन्तरवासिभिः ।
दुःखैरावृश्च्यते क्रूरैर्घुणैरिव जरद्द्रुमः ।। १८

नूनं निगरणायाशु घनगर्धमनारतम् ।
आखुर्मार्जारकेणेव मरणेनावलोक्यते ।। १९

गन्धादिगुणगर्भिण्या शून्ययाऽशक्तिवेश्यया ।
अन्नं महाशनेनेव जरया परिजीर्यते ।। २०

दिनैः कतिपयैरेव परिज्ञाय गतादरम् ।
दुर्जनः सुजनेनेव यौवनेनावमुच्यते ।। २१

विनाशसुहृदा नित्यं जरामरणबन्धुना ।
रूपं खिङ्गवरेणेव कृतान्तेनाभिलष्यते ।। २२

स्थिरतया सुखभासितया तया
सततमुज्झितमुत्तमफल्गु च ।

जगति नास्ति तथा गुणवर्जितं

मरणभाजनमायुरिदं यथा ।। २३

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये वैराग्यप्रकरणे जीवितगर्हा नाम चतुर्दशः सर्गः ।। १४ ।।